दात्तत्वं प्राप्तमित्याद्युदात्तत्वं विधीयते। एवमपि नार्थ एतेन, 'इगन्त° द्विगौ' (६.२.२९/३७६३) इति सिद्धत्वात्? एवं तर्हि ज्ञापनार्थम्। एतज् ज्ञापयति शित्यन्तस्योत्तरपदे द्विगुस्वरो न भवति इति। तेन द्विशितिपाद् इत्यत्र तिशब्द उदात्तो भवति। निमित्तिस्वरबलीयस्त्वस्याप्येकशितिपात्स्वरवचनमेव ज्ञापकं वर्णयन्ति। पात्रेसमिता–दयश्च (२.१.४८/७२५) युक्तारोह्यादयस्ततस्तेऽप्याद्युदात्ता भवन्ति॥

## दीर्घकाशतुषभ्राष्ट्रवटं जे। (८२/३८१६)

दीर्घान्तं पूर्वपदम्, काश तुष भ्राष्ट्र वट इत्येतानि च जे[1] उत्तरपदे आद्युदात्तानि भवन्ति। कुटीजः। शमीजः। [2]काशजः। तुषजः। भ्राष्ट्रजः। वटजः॥

## अन्त्यात् पूर्वं बह्वचः। (८३/३८१७)

जे[3] उत्तरपदे बह्वचः पूर्वपदस्य अन्त्यात् पूर्वमुदात्तं भवति। उपसरजः। मन्दुरजः। आमलकीजः। वडवाजः। बह्वचः इति किम्? दग्धजानि तृणानि॥

## ग्रामेऽनिवसन्तः। (८४/३८१८)

[4]ग्रामशब्दे उत्तरपदे पूर्वपदमाद्युदात्तं भवति न चेद् [5]निवसद्वाचि भवति। मल्लग्रामः। वणिग्ग्रामः। ग्रामशब्दोऽत्र समूहवाची। देवग्रामः। [6]देवस्वामिकः इत्यर्थः। अनिवसन्तः इति किम्? दाक्षिग्रामः। माहकिग्रामः। दाक्ष्यादयो [7]निवसन्ति यस्मिन् ग्रामे स[8] तेषाम् इति व्यपदिश्यते॥

## घोषादिषु च। (८५/३८१९)

घोषादिषु चोत्तरपदेषु पूर्वपदमाद्युदात्तं भवति। दाक्षिघोषः। दाक्षिकटः। दाक्षिपल्वलः। दाक्षिह्रदः। दाक्षिबदरी। [9]दाक्षिपिङ्गलः। [10]दाक्षिपिशङ्गः। [11]दाक्षिशालः। दाक्षिरक्षा। दाक्षिशिल्पी। [12]दाक्ष्यश्वत्थः। कुन्दतृणम्। दाक्षिशाल्मली। आश्रममुनिः। शाल्मलिमुनिः। दाक्षिप्रेक्षा। दाक्षिकूटः। यान्यत्र निवास-नामधेयानि तेषु [13]निवसद्वाचीनि अपि पूर्वपदानि आद्युदात्तानि भवन्ति। अनिवसन्तः इति नानुवर्तयन्ति केचित्। अपरे पुनरनुवर्तयन्ति॥

## छात्र्यादयः शालायाम्। (८६/३८२०)

शालायाम् उत्तरपदे छात्र्यादयः आद्युदात्ता भवन्ति। [14]छात्रिशाला। ऐलिशाला। भाण्डिशाला।

छात्रि। [15]ऐलि। भाण्डि। व्याडि। आपिशलि। आखण्डि। आपारि। गोमि।

यदा शालान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति तदापि 'तत्पुरुषे शालायां नपुंसके' (६.२.१२३/३८५७) इत्येतस्मात् पूर्वविप्रतिषेधेन पूर्वपदमाद्युदात्तं भवति। छात्रिशालम्। ऐलिशालम्॥

---

1. शब्दे इत्यधिकम् ह. 2. काशजः नास्ति फ. 3. शब्दे इत्यधिकम् फ. 4. ग्रामे फ. 5. निवसति फ. ह. 6. देवस्वामिकृतः ह. 7. वसन्ति ड. 8. दाक्षिग्राम इत्युच्यते ब, दाक्षिग्राम इति व्यपदिश्यते ह. 9. दाक्षिपिङ्गलः नास्ति ग. 10. दाक्षिपिशङ्गः नास्ति ह. 11. दाक्षिमशकः फ, नास्ति क. 12. दाक्ष्यश्वः क. ह. 13. निवासवाची क. ह. 14. दाक्षिशाला फ. 15. ऐडिशाला फ.